# श्री गणेश प्रातःस्मरण स्तोत्रं

प्रातः स्मरामि गणनाथमनाथबंधुं
सिंदूरपूरपरिशोभितगंडयुग्मं ।
उद्दंडविघ्नपरिखंडनचंडदंड-
माखंडलादिसुरनायकवृंदवंद्यं ॥ 1

प्रातर्नमामि चतुराननवंद्यमान-
मिच्छानुकूलमखिलं च वरं ददानं ।
तं तुंदिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥ 2

प्रातर्भजाम्यभयदं खलु भक्तशोक-
दावानलं गणविभुं वरकुंजरास्यं ।
अज्ञानकाननविनाशनहव्यवाह-
मुत्साहवर्धनमहं सुतमीश्वरस्य ॥ 3

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकं ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥ 4

॥ इति श्रीगणेश प्रातःस्मरणं स्तोत्रं संपूर्णम् ॥

©2022 Vedam Nadam